"श्मशाने जायते वृक्षः कङ्कगृध्रादिसेवितः", इत्यादिश्च तथापि चेष्टावत्त्वमिन्द्रियवत्त्वञ्च नोद्भिदां स्फुटतरमतो न शरीरव्यवहारः उ०वृ०॥ वृक्षादीनामयोनिजशरीरसत्त्वे प्रमाणान्तरमस्ति "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः" मनुना कर्मविशेषैर्नराणां तद्भावप्राप्तिरुक्ता। "गुरुं तुङ्कृत्य हुङ्कृत्य विप्रं निर्जित्य वादतः। श्मशाने जायते वृक्षः कङ्कगृध्रादिसेवित" इत्यादि वचनेन। अयोनिजशरीरोत्पत्तिकारणमाह। "अनियतदिग्देशपूर्व्वकत्वात्" वै० सू०। "धर्म्मविशेषाच्च" "समाख्याभावाच्च" "अनियतदिग्देशाः परामणबोधर्म्मविशेषजनितकर्म्माणस्तत्पूर्व्वकत्वात् अयोनिजशरीराणाम् ननु परमाणूनां कर्म्म विना कथं द्व्यासमवायिकारणं संयोगमन्तरेण द्व्योत्पत्तिरत आह। अदृष्टवदात्मसंयोगादेव सर्गादौ परमाणूनां कर्म्म तेन च कर्म्मणा सम्भूय परमाणवो द्व्यणुकादिक्रमेण अयोनिजं देवर्षीणां शरीरमारभन्ते इत्यर्थः, उपलक्षणञ्चैतत् अधर्म्मविशेषाच्च क्षुद्रजन्तूनामूष्मजानां यातनामयानि शरीराण्युत्पद्यन्ते इत्यपि द्रष्टव्यम् देवर्षीणामयोनिजे शरीरे प्रमाणान्तरमाह। समाख्या अन्वर्था संज्ञा श्रुतिस्मृतीतिहासपुराणादिषु संज्ञायाआदित्वात् प्रसिद्धा तथाहि दुर्व्वासःप्रभृतयो मानसाः "अहङ्कारेभ्यः समभवदङ्गिरा" इत्यादिका, तथाऽपि ज्ञायते सन्त्ययोनिजानि शरीराणि देवर्षीणामिति प्रमाणान्तरमाह। सर्गादौ या ब्रह्मादिसंज्ञा आदिभृता प्राथमिकी तया ज्ञायते अस्त्ययोनिजं शरीरमिति नहि तदा ब्रह्मणो मातापितरौ स्तः याभ्यां ब्रह्मादिसंज्ञा कृता स्यादिति भावः उपसंहरति। "सन्त्ययोनिजाः" "वेदलिङ्गाच्च वै०सू०" शरीरविशेषा इति शेषः उपसंहृतेऽतिदार्ढ्यार्थं प्रमाणान्तरमाह। वेदो मन्त्रः स च लिङ्ग्यते ज्ञाप्यतेऽनेनेति वेदलिङ्गं ब्राह्मणम्, ततोऽप्ययोनिजं शरीरं प्रतिपद्यते इत्यर्थः। तथाहि ब्राह्मणम् "प्रजापतिः प्रजा अनेका असृजत् स तपोऽतप्यत प्रजाः सृजेयमिति स मुखतो ब्राह्मणमसृजत् बाहुभ्यां राजन्यमूरुभ्यां वैश्यम् पद्भ्यां शूद्रम्" इति, वेदोऽपि "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत" इत्यादिः, एवं योनिजमयोनिजञ्च पार्थिवशरीरमुक्तम्, आप्यं तैजसं वायवीयञ्चायोनिजमेव "ब्रह्मणो मानसा मन्वादय" इति उप० वृत्तिः। "किन्तु देहमयोनिजमिति" भाषा० का०उ०तद्भाष्ये च त्रैविध्यमुक्तं यथा "तेषां खल्वेषां भूतानां त्रीण्येव वीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति" छा०उ० "तेषां जीवाविष्टानां खल्वेषु पक्ष्यादीनां भूतानामेषामिति प्रत्यक्षनिर्द्देशान्नतु तेजःप्रभृतीनां तेषां त्रिवृत्करणस्य वक्ष्यमाणत्वादसति त्रिवृत्करणे प्रत्यक्षनिर्द्देशानुपपत्तिः। देवताशब्दप्रयोगाच्च तेजःप्रभृतिषु इमास्तिस्रोदेवता इति। तस्मात्तेषां खल्वेषां भूतानां पशुपक्षिस्थावरादीनां त्रीण्येव नातिरिक्तानि वीजानि कारणानि भवन्ति। कानि तानीत्युच्यन्ते। आण्डजमण्डाज्जातं अण्डजमेवाण्डजं पक्ष्यादि। पक्षिसर्पादिभ्यो हि पक्षिसर्पादयो जायमाना दृश्यन्ते। ते च पक्षिणां वीजम्। सर्पः सर्पाणां वीजम्। तथाऽन्यदप्यण्डाज्जातं तज्जातीयानां वीजमित्यर्थः भा०। २अयोनिजदेहवति नरादौ च त्रि० "राघवाय तनयामयोनिजाम्" रघुः ३विष्णौ पु०। "वाचस्पतिरयोनिज" इति वि० सह०।

**अयोमय** त्रि० विकारे मयट् स्त्रियां ङीप्। लौहविकारे अस्त्रशस्त्रादौ। "निःक्षेप्यौऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः" गुरुतल्पग्रभिभाष्यैनस्तप्ते स्वप्यादयोमये" इति च मनुः।

**अयोमल** न० अयसो मलमिव। (लौहगू) इतिख्याते लौहमले तत्किट्टे "शताब्दमुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम्" अधमं षष्ठिवर्षीयं ततो हीनं विषोपमम् यल्लौहं यद्गुणं प्रोक्तं तत्किट्टं चापि तद्गुणमिति" राजनि०।

**अयोमुख** न०अयोविकाररूपं मुखं यस्य। १लाङ्गलादौ "भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम्" २अग्रलौहयुक्ते त्रि० भेत्स्यत्यजः "कुम्भमयोमुखेन" रघुः। अय इव कठिनं मुखं यस्य। ३लौहतुल्यकठिनमुखे विहगादौ "अयोमुखाः सूचीमुखाः अयोविकृतिमुखाः पिशाची क्रव्यादो वातरंहसः अथ० ११,१०,३। "श्वानो भीषणकाया अयोमुखानि वयांसि जले गृध्रपक्षिणाञ्च सङ्घाः भा० शा० प०। ४असुरभेदे पु०। "शङ्कुकर्णो विराधश्च गवेष्ठी दुन्दुभिस्तथा अयोमुखः शम्बरश्च कपिलोवामनस्तथा हरिवं०। अयःसुवर्णं मुखमाद्यं यस्य। सुवर्णादिधातौ "अयोमुखैश्च विपुलः पर्व्वतो धातुभिर्युतः इति हरिवं० तत्र भवः ऋश्यादि० छ। अयोमुखीयः तद्भवे त्रि०।

**अयोरस** पु० ६त०। लौहमले। ताप्यमानाल्लोहात् यत् पृथग् भवति तस्मिन् "सर्वायोरसाभ्रचूर्णैः रुद्राः संसृज्ये कात्या० १५,५,८, "अयोरसः लोहसिङ्घानः